**|| श्री स्वामी सामर्थ ||**

---

## ||रुचिमुनि कृत पितृ स्तोत्रं ||

---

|श्री गणेशाय नमः|

श्री स्वामी सामर्थाय नमः ।

*(शीघ्र विवाह व संतान प्राप्ती होण्यासाठी)*

रूचिरूवाच

नमस्येऽहं पितृन् भक्त्या ये वसन्त्यधिदेवतम् ।
देवैरपि हि तर्प्यन्ते ये श्राद्धेषु स्वधोत्तरैः ॥१॥

नमस्येऽहं पितृन् स्वर्ग ये तर्प्यन्ते. महर्षिभिः ।
श्राद्धेर्मनोमयैर्भक्तया भुक्ति-मुक्तिमभीप्सुभिः ॥२॥

नमस्येऽहं पितृन् स्वर्गे सिद्धाः संतर्पयन्ति यान् ।
श्रद्धेषु दिव्यैः सकलै रूपहारैरनुत्तमैः ॥३॥

नमस्येऽहं पितृन् भक्त्या येऽर्च्यन्ते गुह्यकैर्दिवि ।
तन्मयत्वेन वाच्छद्धर्द्धिमात्यन्तिकीं पराम्॥४॥

नमस्येऽहं पितृन् मर्त्यैरर्च्यन्ते भुवि ये सदा ।
श्राद्धेषु श्रद्धयाभीष्ट-लोक-पुष्टि-प्रदायिनः ॥५॥

नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा ।
वाञ्छिताभीष्ट-लाभाय प्राजापत्य-प्रदायिनः ॥६॥

नमस्येऽहं पितॄन् ये वै तर्पयन्तेऽरण्यवासिभिः ।
वन्यैः श्राद्धैर्यताहारैस्तपोनिर्धूतकल्मषैः ॥७॥

नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकैर्धर्मचारिभिः ।
ये संयतात्मभिर्नित्यं संतर्प्यन्ते समाधिभिः ॥८॥

नमस्येऽहं पितॄन् श्राद्धै राजन्यास्तर्पयंति यान्।
कव्यैरशेषैर्विधिवल्लोकत्रय-द्वय-फलप्रदान् ॥९॥

नमस्येऽहं पितॄन् वैश्यरर्च्यन्ते भुवि ये सदा ।
स्वकर्माभिरतैर्नित्यं पुष्पधूपान्नवारिभिः ॥१०॥

नमस्येऽहं पितुन् श्राद्धैर्ये शूद्रैरपि च भक्तितः ।
संतर्प्यन्ते जगत्कृत्स्नं नाम्ना ख्याताः सुकालिनः ॥११॥

नमस्येऽहं पितॄन् श्राद्धैः पाताले ये महासुरैः ।
संतर्प्यन्ते सुधाहारास्त्यक्तदम्भमदैः सदा॥१२॥

नमस्येऽहं पितॄन् श्राद्धैरर्च्यन्ते ये रसातले।
भोगैरशेषैर्विधिवन्नागैः कामानभीप्सुभिः ॥१३॥

नमस्येऽहं पितॄन् श्राद्धैः सर्पैः संतर्पितान् सदा ।
तत्रैव विधिवन्मंत्रभोगसंपत्समन्वितैः ॥१४॥

पितॄन्नमस्ये निवसन्ति साक्षाद्ये देवलोकेऽथ महीतले वा ।

तथान्तरिक्षे च सुरारिपूज्यास्ते वै प्रतीच्छन्तु मयोपनीतम् ॥१५॥

पितृन्नमस्ये परमार्थभूता ये वै विमाने निवसन्त्यमूर्ताः ।
यजन्ति यानस्तमलैर्मनोभिर्योगीश्वराः क्लेश-विमुक्ति-हेतून् ॥१६॥

पितृन्नमस्ये दिवि ये च मूर्ताः स्वधाभुजः काम्यफलाभिसन्धौ ।
प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येऽनभिसंहितेषु ॥१७॥

तृप्यंतु तेऽस्मिन् पितरः समस्ता इच्छावतां ये प्रदिशंति कामान् ।
सुरत्वमिन्द्रत्वमितोऽधिकं वा गजाश्वरत्नानि महागृहाणि ॥१८॥

सोमस्य ये रश्मिषु येऽर्कबिम्बे शुक्ले निमाने च सदा वसन्ति ।
तृप्यन्तु तेऽस्मिन्पितरोऽन्नतोयैर्गन्धादिना पुष्टिमितो व्रजंतु ॥१९॥

येषां हुतेऽग्नौ हविषा च तृप्तिर्ये भुञ्जते विप्र-शरीर-संस्थाः।
ये पिण्डदानेन मुदं प्रयान्ति तृप्यन्तु तेऽस्मिन्पितरोऽन्नतोयैः ॥२०॥

ये खड्गमांसेन सुरैरभीष्टैः कृष्णैस्तिलैर्दिव्यमनोहरैश्च ।
कालेनशाकेन महर्षि वर्यैः संप्रीणितास्ते मुदमत्र यान्तु ॥२१॥

कव्यान्यशेषाणि च यान्यभीष्टान्यतीव तेषां मम पूजितानाम् ।
तेषां च सांनिध्यमिहास्तु पुष्पगन्धाम्बुभोज्येषु मया कृतेषु ॥२२॥

दिने दिने ये प्रतिगृहतेऽर्चां मासान्तपूज्या भुवि येऽष्टकासु ।
ये येवत्सरान्तेऽभ्युदये च पूज्याः प्रयान्तु ते मे पितरोऽत्र तुष्टिम् ॥२३॥

पूज्या द्विजानां कुमुदेन्दुभासो ये क्षत्रियाणां ज्वलनार्कवर्णाः ।
तथा विशां ये कनकावदाता नीलीप्रभाः शूद्रजनस्य ये च॥२४॥

तेऽस्मिन्समस्ता मम पुष्प-गन्ध-धूपाम्बुभोज्यादिनिवेदनेन ।
तथाग्निहोमेन च यान्ति तृप्तिं सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः॥२५॥

ये पूर्वाण्यतितृप्तिहेतोरश्नंति कव्यानि शुभाहृतानि ।
तृप्ताश्च ये भूतिसृजो भवन्ति तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥२६॥

रक्षांसि भूतान्यसुरंस्तथोग्रान् निर्णाशयन्तु त्वशिवं प्रजानाम् ।
आद्याः सुराणाममरेशपूज्यास्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥२७॥

अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं श्राद्धेऽस्मिन् पितरस्तर्पिता मया॥२८॥

अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम्।
तथा बहिषदः पान्तु याम्यां मे पितरः सदा ॥२९॥

प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः॥३०॥

रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः।
सर्वतः पितरो रक्षां कुर्वन्तु मम नित्यशः॥ ३१॥

विश्वो विश्वभुगाराध्यो धर्मो धन्यः शुभाननः।
भूतिदो भूतिकृद् भूतिः पितृणां ये गणा नव ॥३२॥

कल्याणः कल्यदः कर्ता कल्यः कल्यतराश्रयः।
कल्यताहेतुरनघः षडिमे ते गणाः स्मृताः ॥३३॥

वरो वरेण्यो वरदस्तुष्टिदः पुष्टिदस्तथा ।

विश्वपाता तथा धाता सप्तैते च गणाः स्मृताः ॥३४॥

महान्महात्मा महितो महिमावान्महाबलः।
गणाः पंच तथैवैते पितृणां पापनाशनाः ॥३५॥

सुखदो धनदश्चान्यो धर्मदोऽन्यश्च भूतिदः ।
पितृणां कथ्यते चैव तथा गणचतुष्टयम् ॥३६॥

एकरत्निंशत्पितृगणा यैर्व्याप्तमखिलं जगत् ।
त एवात्र पितृगणास्तुप्यन्तु च मदाहितात् ॥३७॥

श्री मार्कण्डेय उवाच
एवं तु स्तुवतस्तस्य तेजसौ राशिरुच्छ्रितः।
प्रादुर्बभूव सहसा गगनव्याप्तिकारकः ॥३८॥

तद्दृष्टा सुमहत्तेजः समाच्छाद्य स्थितं जगत्।
जानुभ्यामवनीं गत्वा रुचिः स्तोत्रमिदं जगौ ॥३९॥

रुचिरुवाच
अर्चितानाममूर्तानां पितृणां दीपतेजसाम्।
नमस्यामि सदा तेषां ध्यानिनां दिव्यचक्षुषाम् ॥४०॥

इन्द्रादीनां च नेतारो दक्षमारीचयोस्तथा।
सप्तर्षीणां तथान्येषां तान्नमस्यामि कामदान् ॥४१॥

मन्वादीनां च नेतारः सूर्याचन्द्रमसोस्तथा ।
तान्नमस्याम्यहं सर्वान पितृनप्युदधावपि ॥४२॥

नक्षत्राणां ग्रहाणां च वाय्वन्न्योर्नभसस्तथा ।
द्यावापृथिव्योश्च तथा कृतांजलिः ॥४३॥

प्रजापतेः कश्यपाय सोमाय वरुणाय च।
योगेश्वरेभ्यश्च सदा नमस्यामि कृतांजलिः ॥४४॥

नमो गणेभ्यः सपतभ्यस्तथा लोकेषु सप्तसु ।
स्वायम्भुवे नमस्यामि ब्रह्मणे योगचक्षुषे ॥४५॥

सोमाधारान् पितृगणान् योगमूर्तिधरांस्तथा।
नमस्यामि तथा सोमं पितरं जगतामहम्॥४६॥

अग्निरूपांस्तथैवान्यान्नमस्यामि पितृनहम् ।
अग्निसोममयं विश्च यत् एतदशेषतः ॥४७॥

ये च तेजसि ये चैते सोमसूर्याग्नमूर्तयः।
जगत्स्वरूपिणश्चैव तथा ब्रह्मस्वरूपिणः ॥४८॥

तेभ्योऽखिलेभ्यो योगिभ्यः पितृभ्यो यतमानसः ।
नमो नमो नमस्तेऽस्तु प्रसीदन्तु स्वधाभुजः ॥४९॥

श्री मार्कण्डेय उवाच
एवं स्तुतास्ततस्तेन तेजसो मुनिसत्तमाः ।
निश्चक्रमुस्ते पितरो भासयन्तो दिशो दश॥५०॥

निवेदनं च यत्तेन पुष्पगन्धानुलेपनम् ।
तद्भूषितानथ स तान् ददृशे पुरतः स्थितान् ॥५१॥

प्रणिपत्य रुचिर्भक्त्या पुनरेव कृताञ्जलिः।
नमस्तुभ्यं नमस्तुभ्यमित्याह पृथगादृतः ॥५२॥

पितर ऊचुः

स्तोत्रेणानेन च नरो यो मां स्तोष्यति भक्तितः।
तस्य तुष्टा वयं भोगानात्म ज्ञानं तथोत्तमम्॥५३॥

शरीरारोग्यमर्थं च पुत्रपौत्रादिकं तथाः।
प्रदास्यामो न संदेहो यच्चान्यदभिवांछितम्॥५४॥

तस्मात्पुण्यफलं लोके वांछिद्भिः सततं नरैः।
पितृणां चाक्षयां तृप्ति स्तव्या स्तोत्रेण मानवैः॥५५॥

वाञ्छद्भिः सततं स्तव्यां स्तोत्रेणानेन वै यतः।
श्राद्धे च य इमं भक्त्या अस्मत्प्रीतिकरं स्तवम्॥५६॥

पठिष्यंति द्विजाग्र्याणां भुजंतांपुरतः स्थिताः।
स्तोत्र श्रवण संप्रीत्या सन्निधाने परेकृते॥५७॥

अस्माकम क्षयं श्राद्धं तद्भविष्यत्य संशयम्।
यद्यप्यश्रोत्रियं श्राद्धं यद्यप्युपहतं भवेत्॥५८॥

अन्यायोपात्तवित्तेन यदि वा कृतमन्यथा।
अश्राद्धार्हैरूपहृतैरूपहारैस्तथा कृतम्॥५९॥

अकालेऽप्यथवाऽदेशे विधिहीनमथापि वा।
अश्रद्धया वा पुरूषैर्दंभमाश्रित्य वा कृतम्॥६०॥

अस्माकं तृप्तये श्राद्धं तथाप्येतदुदीरणात्।
यत्रेतत्पठ्यते श्राद्धेस्तोत्रमस्मत्सुखावहम्॥६१॥

अस्माकं जायते तृप्तिस्तत्र द्वादशवार्षिकी।
हेमन्ते द्वादशाद्वानि तृप्तिमेतत्प्रयच्छति॥६२॥

शिशिरे द्विगुणाब्दांश्च तृप्तिस्तोत्रमिदं शुभम्।
वसन्ते षोडश समास्तृप्यते श्राद्धकर्मणि॥६३॥

ग्रीष्मे च षोडशे वैतत्पठितं तृप्तिकारकम्।
विकलेऽपि कृते श्राद्धे स्तोत्रेणानेन साधिते॥६४॥

वर्षासु तृप्तिरस्माकमक्षया जायते रूचे।
शरत्काले पिपठितं श्राद्धकाले प्रयच्छति॥६५॥

अस्माकमेतत्पुरूषैस्तृप्तिं पंचदशाद्बिकाम्।
यस्मिन् गृहे च लिखितमेतत्तिष्ठति नित्यदा॥६६॥

सन्निधानं कृते श्राद्धे तत्रास्माकं भविष्यति।
तस्मादेतत्त्वया श्राद्धे विप्राणां भुंजतां पुरः॥६७॥

श्रावणीयं महाभाग अस्माकं पुष्टिहेतुकम्।
इत्युक्त्वा पितरस्तस्य स्वर्गता मुनिसत्तम॥६८॥

॥ इति श्री गरुड पुराणे रुचिमुनि कृत पितृस्तोत्रम् संपूर्ण ॥
श्रीगुरुदत्तात्रेयार्पणमस्तु ॥
॥श्री स्वामी समर्थापर्ण मस्तु॥